॥ ओ३म् ॥

तादृशी जायते
बुद्धिर्व्यवसायोऽपि तादृशः।
सहायास्तादृशा एव
यादुशी भवितव्यता॥
( चाणक्य-नीति )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-21/5379/2014-2016

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com मूल्यम्-रू. ५/- द्विवार्षिक शुल्कम्-रू. २४०/-

॥ ओ३म् ॥

स्वयं कर्म करोत्यात्मा
स्वयं तत्फलमश्नुते।
स्वयं भ्रमति संसारे
स्वयं तस्माद्विमुच्यते॥
( चाणक्य-नीति )

卐 वर्षम्-५ 卐 अंकः-१७ ( ११३ ) 卐 १ मार्चमासः २०१६तः १५ मार्चमासः २०१६ पर्यन्तम् 卐 विक्रमसंवत्-२०७२ 卐 सृष्टिसंवत्-१,९६,०८,५३,११५ 卐 पृष्ठम्-८

## राष्ट्रियसंस्कृतसंस्थानस्य त्रयोदशतमः संस्कृतनाट्यमहोत्सवः समायोजितः

नवदेहली । 2016तमे वर्षे फरवरीमासे नवदेहलीस्थेन राष्ट्रियसंस्कृतसंस्थानेन त्रयोदशतमः संस्कृतनाट्यमहोत्सवः समायोजितः । अस्योद्घाटनं समारोहः देहलीकेन्टस्थाने




केन्द्रीयविद्यालयनं.-2 इत्यत्र सर्वपल्लीराधाकृष्णन्सभागारे संस्थानस्य कुलपतीनां आचार्यपरमेश्वरनारायणशास्त्रिणाम् अध्यक्षतायामभवत् । कार्यक्रमस्यास्य मुख्यातिथित्वेन अन्ताराष्ट्रियख्यातिप्राप्ताः महनीयविद्वांसः प्राच्यविद्याविभागस्य मैसूरविश्वविद्यालयस्य श्रीएच.वी.नागराजनमहोदयाः अपि च सारस्वतातिथित्वेन श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतयः प्रो.रमेशकुमारपाण्डेयमहोदयाः सादरं समुपस्थिताः आसन् । जम्मूपरिसरस्य छात्राभिः सरस्वतीवन्दनानन्तरं नाट्यमहोत्सवस्य संयोजकैः मुक्तस्वाध्यायपीठस्य निदेशकैः प्रो. रमाकान्तपाण्डेयमहोदयैः स्वागतभाषणे कथितं यत् नाट्यमहोत्सवोऽयं दिवसत्रयं यावत् प्रचलिष्यति अपि चात्र राष्ट्रियसंस्कृतसंस्थानस्य एकादशपरिसरैः एकादशप्रहसनानां मञ्चनं क्रियते । अन्ते च तैः प्रतिपादितं यत् त्रयोदशवर्षेभ्यः संस्थानेन आयोज्यमानेऽस्मिन् नाट्यमहोत्सवे प्रायशः 133संस्कृतनाटकानां मञ्चनं कृतं यच्च कयापि एकया संस्थया संस्कृतभाषायां निबद्धानां नाटकानां मञ्चने सर्वाधिकं वर्तते ।

मुख्यातिथिभिः प्रो.रावमहोदयैः कथितं यत् नाट्यमहोत्सवोऽयमतीव महत्वपूर्णं वर्तते यतोहि शताब्दपूर्वं विरचितानां प्रहसनानां साम्प्रतिकैः रचनाकारैः विरचितानां प्रहसनानां सामञ्जस्यत्वेन भरतनाट्यशास्त्रस्य नियमानुसारं मञ्चनं सुस्पष्टतया अत्र क्रियते । तैः कथितं यत् साम्प्रतिके युगे मानवजीवने सुखसमृद्ध्यर्थं एतादृशानां प्रहसनानां महती प्रांसङ्गिकताऽस्ति ।

सारस्वतातिथिभिः प्रो.रमेशकुमारपाण्डेयमहोदयैः कथितं यत्

**शेषभागःद्वितीयपुटे**

## गोरक्षा गवां च राष्ट्रमातृत्वेन घोषणायाः अभिलाषया देहल्यां रामलीलापरिक्षेत्रे महासम्मेलनम्

वसु**देवसिंहरावतः**

नवदेहली । गोरक्षा एवं गवां राष्ट्मातृत्वेन घोषणायाः अभिलाषया देहल्यां रामलीलापरिक्षेत्रे विशालसम्मेलनस्य आयोजनमभवत् । गौक्रान्तिमञ्चेन सुप्रसिद्धगौरक्षावाचकानां




श्रीगोपालमणिमहाराजानां नेतृत्वे समायोजितेऽस्मिन् सम्मेलने विदेशेभ्यः भारतस्य च सर्वेभ्यः राज्येभ्यः लक्षसंख्यायां गौभक्तैः भागं गृहीतम् । सम्मेलनस्य अस्य मुख्यातिथित्वेन भाजपासांसदः प्रसिद्धा अभिनेत्री श्रीमतीहेमामालिनी उपस्थिता आसीत् । श्रीमतीमालिनीमहोदया कथितं यत् गवां रक्षा अस्माकं समेषां उत्तरदायित्वं वर्तते । ते अस्मिन्नान्दोलने गौभक्तैः सह तिष्ठन्ति । अस्मिन्नवसरे सांसदाः श्रीश्यामजाजूमहोदयः अपि च श्रीकीर्तिआजादमहोदयेनापि सम्मेलनं सम्बोधितम् ।

अस्मिन् अवसरे श्रीगोपालमणिमहाराजैः रामलीलापरिक्षेत्रे उपस्थितान् समेषां गोभक्तान् सम्बोधयन् कथितं यत् गोमातुः रक्षायाः कृते पञ्चसूत्रीयं प्रतिवेदनं सर्वकारस्य समक्षे अस्माभिः प्रेष्यते । यस्मिन् गोमाता राष्ट्रमाता स्यादित्युद्घोषणा भवेत्,




गोमन्त्रालयस्य स्थापना भवेत्, दशवर्षं यावत् बालान् कृते निःशुल्कगोदुग्धस्य उपलब्धता भवेत्, गोहत्या कर्तृणां कृते कठोरदण्डस्य प्रावधानं भवेदिति ।

सम्मेलनेऽस्मिन् साधुसन्तैः सह जैनमुनिना श्रीलोकेशमहाराजेनापि श्रीगोपालमणिमहाराजानां समर्थनं कृतम् । सम्मेलनस्यान्ते गोभक्तैः श्रीगोपालमणिमहाभागानां नेतृत्वे जन्तरमन्तरस्थाने अनिश्चितकालीनमान्दोलनं प्रारब्धम् । अस्मिन् अवसरे राष्ट्रपतिमहोदयानां कृते प्रधानमन्त्रिमहोदयानां च कृते सम्बन्धितं ज्ञापनम् प्रदत्तम् ।

## संस्कृतेः संस्काराणां च सम्पन्नतायां विश्वगुरुः देशोऽस्माकमिति –कुमारविश्वासः

नवदेहली । सर्वविदितमेव यत् भारतं विश्वगुरुरिति कथ्यते । वस्तुतः वैदिककालस्य अपि वेदाङ्गकालस्य साहित्याधारेण ज्ञानविज्ञानस्य संस्कृतेः संस्काराणां सम्पन्नतायां भारतमेव सर्वातिशायी वर्तते । विचारोऽयं दिल्लीसंस्कृताकादम्या





दिल्लीसर्वकारेण राजीवचौकस्ये केन्द्रीयोद्याने वसन्तोत्सवस्यावसरे समायोजितायां संस्कृतसंगीतसन्ध्यायाः अवसरे समागतैः सुप्रसिद्धकविभिः श्रीकुमारविश्वासमहादयैः प्रतिपादिताः । श्रीविश्वासमहोदयेन कथितं यत् अद्य भवद्भिः संस्कृतस्य गीतानि नूतनविधया श्रुतम् । श्रीविश्वासमहोदयेन समेषां संस्कृतानुरागीणां कृते देहल्याः निवासीनां च कृते शुभाशयाः प्रदताः ।

अस्मिन्नवसरे अकादम्याः सचिवेन डॉ.जीतरामभट्टमहोदयेन कथितं यत् संस्कृतभाषा नादमयी भाषाऽस्ति । अस्याः प्रत्येकस्मिन् वाक्ये नैसर्गिकः स्वरः वर्तते । दिल्लीसंस्कृताकादम्या दिल्लीसर्वकारेण संस्कृतानुरागीणां कृते अत्र संस्कृतसंगीतसन्ध्यायाः कार्यक्रमेऽस्मिन् संस्कृतगीतानाम् आधुनिकसंगीतेन आधुनिकवाद्ययन्त्रैः सह प्रस्तुती कृता । प्रस्तुतिरिमा भोपालस्य सुप्रसिद्धसंस्कृतसमूहेन 'ध्रुवा' इत्यनेन कृता । अनेन संस्कृतगीतेषु ऋग्वेदस्य ऋचाः शिवताण्डवस्तोत्रम्, भजगोविन्दम्, वसुधैवकुटुम्बकम् इत्यादिगीतानामपि च वन्देमातरम् इत्यस्य प्रस्तुतिः प्रदत्ता ।

अस्मिन् अवसरे अकादम्याः उपाध्यक्षैः प्रो.गणेशदत्तशर्मणा कथितं यत् देहल्यां संस्कृतभाषायाः विकासाय प्रचाराय प्रसाराय दिल्लीसर्वकारेण दिल्लीसंस्कृताकादम्या माध्यमेन नैकाषां कार्यक्रमाणामायोजनं क्रियते । येषु शिक्षणकेन्द्रेषु संस्कृतविषयकपरिचर्चाः, संगोष्ठ्याः, साहित्यसम्मेलनानि, संस्कृतनाटकमञ्चनम्, विविधाः संस्कृतप्रतियोगिताः यथासमयं समायोज्यन्ते । अस्मिन्नेव क्रमे अद्य संस्कृतसंगीतसन्ध्यायाः आयोजनमत्र अभवत् ।

अस्मिन्नवसरे दिल्लीसर्वकारस्य खाद्यापूर्तिमन्त्रिणः श्रीइमरानहुसैनमहोदयाः उपस्थिताः आसन् । कार्यक्रमेऽस्मिन् नैकाः गणमान्यजनाः संस्कृतानुरागिणः अपि च संगीतानुरागिणः उपस्थिताः आसन् ।

प्रथमपुटस्य शेषभागः

## राष्ट्रियसंस्कृतसंस्थानस्य त्रयोदशतमः......

भरतमुनिना प्रणीते नाट्यशास्त्रे दशरूपकेषु प्रहसनेन हास्यरसस्य माध्यमेन साहित्यजगतमुपकृतम् । तैः कथितं यत् अद्यत्वे हास्यरसस्य





व्यङ्ग्यात्मकप्रयोगः अस्माभिः एतैः प्रहसनैः दृश्यते ।

राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिभिः प्रो. परमेश्वरनारायणशास्त्रीमहोदयेन कथितं यत् संस्कृतवाङ्मये नैकाषां विधानां सृजनं जातम् । तास्वेव विधासु इमा विश्वप्रसिद्धा । संस्थानस्य बहुपरिसरीयछात्र-छात्राभिः देशस्य विदेशानां च





सम्माननीयमञ्चेषु एतेषां नाटकानां मञ्चनं कृतम् ।

अत्र दिवसत्रयं यावत् विविधपरिसरीयछात्र-छात्राभिः विविधानां प्रसहनानां मञ्चनं कृतम् । अस्मिन्नवसरे विविधाः विद्वांसः, आचार्याः, छात्राः अपि च गणमान्यजनाः उपस्थिताः आसन् ।

# स्नातकोत्तरमहाविद्यालये द्विदिवसीयसंस्कृतसगोष्ठ्याः समायोजनम्

हरिद्वार । एसएमजेएन-स्नातकोत्तरमहाविद्यालये द्विदिवसीयराष्ट्रीयसंगोष्ठ्याः समायोजनं वाणिज्यविभागस्य तत्वावधानेऽभवत् । अस्यां संगोष्ठ्यां वाणिज्यक्षेत्रस्य बहवो विद्वांसः समुपस्थिताः आसन् । दिवसद्वयपर्यन्तं देशस्य




विभिन्नेभ्यः विश्वविद्यालयेभ्यः समागत्य प्रतिभागिभिः स्वकीय शोधपत्राणि अत्र प्रस्तुताः । कार्यक्रमे संस्कृतविश्वविद्यालयस्य कुलपतयः प्रो.महावीरअग्रवालमहोदयाः मुख्यातिथित्वेन उपस्थिताः आसन् ।

संस्कृतविश्वविद्यालयस्य कुलपतिभिः प्रो. अग्रवालमहोदयैः कथितं यत् एतादृशानि आयोजनानि छात्राणां शोधजिज्ञासायाः संवर्धनार्थं सर्वथा आवश्यकानि । अत्र समागतानां विदुषां वचनैः अवश्यमेव एताः छात्राः लाभान्विताः भविष्यन्ति । तैः कथितं यत् आधुनिकविचारैः सममेव स्वकीयप्राच्यसंस्कृत्याः सभ्यतायाः वेदपुराणादीनाम् उपनिषदामध्ययनमपि छात्रैः कर्तव्यम् ।

तत्र च वाणिज्यसंकायस्य विभागाध्यक्षैः डॉ. सुनीलबत्रामहोदयेन कथितं यत् संगोष्ठ्याः यत् विषयचयनं कृतम्, तेन अस्माकं प्रयासोऽस्ति यत् ते स्वकीयनैतिकदायित्वानां मूल्यानां च प्रति जागरुको भवेयुः ।

अस्मिन्नवसरे निरंजनीमहन्तः श्रीरामानन्दपुरी, महन्तः श्रीलालतागिरी, प्रो.डीपीएसवर्मा, प्रो.नवलकिशोरः, प्रो. एकेघिल्डियाल, डॉ.टी.वी.तोमरः,डॉ.सरितापाठकः, आदयः अन्येऽपि च गणमान्यजनाः उपस्थिताः आसन् ।

# गोरक्षार्थं जन्तरमन्तरस्थाने सत्याग्रहस्य कृते सर्वेषां राजनितिकदलानां समर्थनम्

नवदेहली । गतरविवासरे नवदेहल्यां रामलीलापरिक्षेत्रे भारतीयगौक्रान्तिमञ्चेन विशालसम्मेलनस्य आयोजनेन पूज्यश्रीगोपालमणिमहाराजानां नेतृत्वे जन्तरमन्तरस्थाने सत्याग्रहस्य आरम्भः कृतः । एतत् मन्यते यत् अनिश्चितकालीनमेतदान्दोलनं सर्वकारेण








पञ्चसूत्रीयप्रतिवेदनस्य स्वीकरणस्य पर्यन्तं प्रचलिष्यति । अस्मिन् गोरक्षा आन्दोलने समग्रदेशात् साधवः सन्ताश्च विशालसंख्यायां गोभक्ताश्च अपि च विविधानां राजनितिकदलानां नेतारः सम्मिलिताः आसन् ।

अस्य आन्दोलनस्य देशव्यापिनं प्रभावं दृष्टवा सर्वकारः असहजस्थित्यामस्ति । भारतीयगौक्रान्तिमञ्चस्य कार्यकर्ताणां समर्थने यत्र भाजपासांसदः योगीश्रीआदित्यनाथमहोदयः, श्रीनाटूभाईपटेलमहोदयः तथा च दमनद्वीपस्य सांसदः लालूभाईपटेलमहोदयः अपि उपस्थिताः आसन् तत्रैव कांग्रेसदलस्य वरिष्ठनेतारः श्रीदिग्विजयसिंहमहोदयः, श्रीमुकेशराजपूतमहोदयश्च उपस्थिताः आसन् । सर्वैः प्रधानमन्त्रिणा अस्याः वार्तायाः संज्ञानस्य वार्ता कथिता । दिग्विजयसिंहमहोदयेन गौरक्षासम्बन्धिविषयाणाम् उपयुक्तता स्वीकृत्य कथितं यत् सर्वकारेण अविलम्बेन एतासां विषयाणां स्वीकरणं कर्तव्यमिति ।

पूर्वदेहलीतः समागताः महामण्डलेश्वराः स्वामिनः श्रीरामानन्दजीमहाराजैः कथितं यत् अस्य आन्दोलनस्य गत्यर्थं सर्वैः लोकसभायाः राज्यसभायाः च सांसदैः सहमतिपत्रहस्ताक्षराभियानं प्रवर्तितव्यम् । आन्दोलनस्य राजनीतिकरणं नैव भवेदिति । आन्दोलनस्य नेतृत्वकर्तृभिः श्रीगोपालमणिमहाराजैः कथितं यर्त संघर्षोऽयमस्माकं प्रतिवेदनस्य स्वीकरणं यावत् प्रचलिष्यित्येव ।

# सम्पादकीयम्

## गौरक्षा आन्दोलनम्

विश्वे भारतमतिरिच्य कश्चिदेतादृश: देशो स्यात् यत्र एतावत्प्रदर्शनानि आन्दोलनानि च भवन्ति । अस्मिन् देशे लोकतन्त्रात् प्रत्येकस्य उचितानुचितकार्यस्य वा कृते तस्य पूर्त्यर्थं जनान्दोलनस्य आवश्यकता सदैव भवत्येव । निश्चयमेव भारतीयलोकतान्त्रिकव्यवस्थाया: दुष्परिणामो एतत् यत्र सत्तापक्षेण जनानामावश्यकता आन्दोलनै: एव श्रूयते ।

गोरक्षाविषयेऽपि आन्दोलनं काचित् नूतनं वार्ता नास्ति । परञ्च धर्मनिरपेक्षताया: कारणात् बहुसंख्यकानां समुदायानां प्रति सर्वकारेणावधानं नैव प्रदीयते । पञ्चाशतवर्षपूर्वं श्रीमतीइन्दिरागान्धीमहोदयानां शासनकालेऽपि गोरक्षाया: आन्दोलनेन उच्चस्वरेण वार्ता स्थापिता परञ्च क्रूरतया तस्य आन्दोलनस्य निराकरणं सर्वकारेण कृतम् । तदनन्तरं प्रशासनस्य रणनित्यानुसारमेव गोरक्षका: संगठिता: नैव अभवन् । विगतवर्षेभ्य: एषाभिलाषा पुन: आन्दोलनस्य स्वरूपं गृह्णाति । गौरक्षका: श्रीगोपालमणिमहाराजानां नेतृत्वे वर्षद्वयपूर्वमपि गौरक्षाया: वार्ता प्रारब्धा यस्य च समर्थनं विविधै: साधुसन्तै: कृतम् । सत्तापक्षस्य पार्श्वे एताषां पूर्त्यर्थं पर्याप्तसमयमासीत् तथापि तदा किमपि नैव अभवत् । यस्य च परिणामस्वरूपं अस्मिन् फरवरीमासस्य अष्टाविंशतितमे दिनांके आचार्यगोपालमणिस्वामिना पुन: विशालजनसभाया: आयोजनं कृतम् । तत्र लक्षसंख्यायां गौभक्ता: सम्मिलिता: अभवन् । केन्द्रसर्वकाराय पञ्चसूत्रीयप्रतिवेदनं प्रदत्तम् । यस्य च समर्थने देहल्यां जन्तरमन्तरस्थाने अनिश्चितकालीनान्दोलनं क्रियते ।

देशस्य अयं दुर्भाग्यमस्ति यत् अहिंसया चलायमानान् आन्दोलनान् सर्वकार: गम्भीरतया नैव स्वीकरोति । तत्र जनोपयोगि: तथा राष्ट्रहितस्य प्रत्येकं विषयं राजनैतिक-सामुदायिकता दृष्ट्या एव स्वीक्रियते । गौरक्षाऽऽन्दोलनमपि अनेन दृष्टिकोणेन एव दृष्ट: । अद्यत्वे देशस्य केन्द्रसर्वकारे भाजपाया: आधिपत्यमस्ति यस्योपरि हिन्दुत्वसंवाहकस्य कृतलक्षण: अस्ति । अतश्च ते स्वकीय संवैधानिकं राष्ट्रियदायित्वं च पूर्त्यर्थं अस्मात् विभ्यन्ति यत् कदाचित् अल्पसंख्यका: रुष्टा: मा भवेयु: । इतोऽपि भयावहमस्ति यत् देशस्य सांस्कृतिकार्थिकस्य च संरचनाया: आधारं गामेकस्मिन् धर्मेण संयोज्य धर्मनिरपेक्षताया: आडम्बरं क्रियते ।

अत: केन्द्रसर्वकारेण स्वत: गोरक्षा सम्बन्धे संज्ञान गृहीत्वा देशस्य हिते एतासां प्रतिवेदनानां स्वीकरणं कृत्वा स्वकीयकर्तव्यनिर्वहनं कर्त्तव्यम् ।

ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति सत्यार्थ प्रकाश के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# पुराणेषुनारीणांराजनीतौस्थानम्

संदीपकुमारउपाध्याय

वैदिककालत:पुराणकालंयावत्भारतीयवाङ्मयेस्वल्पमात्रमेवैतादृशंविवरणंप्राप्यतेयस्मिन्रा-ज्ञयोराजकुमार्यश्चशासन-भारंराजसिंहासनंवाअलङ्कुर्वन्। पुराणकालानन्तरं बौद्धजातक-कथासुराज-महिषीणांशासनस्योल्लेख:अवश्यमेवप्राप्यते। पुराणसमयेऽपिनार्योयुद्धेभागंगृह्णन्तिस्म।अस्यचविस्तृतविवरणंपुराणेषु-समुपलभ्यते। स्कन्दपुराणेमुरदैत्यपुत्रीकानकटङ्कटाकृष्णेन-सहयोधितवती–

**ततोहतेमुरौदैत्येमयातस्यसुताव्रजत्।**
**योद्धंमामतिवीर्यत्वाद्घोराकामकटङ्कटा।।**
**तांततोहंमहायुद्धेखड्गखेटकधारिणीम्।**
**अयोधयंमहाबाण:सुशारङ्गधनुयश्युत:।।**

मार्कन्डेयपुराणेदेवीभागवतपुराणादिषु चदेवीनांचण्डमुण्ड-महिषासुरादिदैत्यै:सहयुद्धस्यविस्तृतंवर्णनंप्राप्यते । कल्किपुराणस्यतृतीयांशेन्नीभि:सहकल्केर्युद्धस्यचित्रणमतीवरोचक-प्रकारेणवर्णितमस्ति–

**तेषांन्त्रियोरथारूढागजारूढाविहगवान।**
**समारूढाहयारूढाखरोष्ट्रवृषवाहना:।।**
**योद्धंसमायुजस्त्यक्त्वापत्यपत्यसुखाश्रयात्।**
**रूपवत्योयुवत्योऽतिबलवत्य:पतिव्रता:।।**

मार्कण्डेयपुराणेषुमनोरमअनामिकाया:कन्याया:समीपेसर्वासांन्नेणांहृदय-विद्यासत्वस्योल्लेखोप्राप्यतेमयाऽपिशिक्षितंवीर! सकाशाद्बालयापितु:।

हृदयंसकलशान्नमशेषरिपुनाशम्।। मार्कण्डेयपुराणेमदालसाया:-वर्णनंप्राप्यतेसासविस्तरंस्वपुरान्राजधर्ममुपदिशतिस्म वत्स! राज्येऽभिषिक्तेनप्रजारञ्जनमादित:कर्श्रव्यविरोधेनस्वधर्मस्यमहीभुता–

**व्यस्नानिपरित्यज्यसप्तमूलहराणिवै।**
**आत्मारिपुभ्य:संरक्ष्योबर्हिमन्त्रविनिर्गमात्।।**

एतदधिकस्यराजधर्मस्योपदेशोनकेनापिराजधर्मज्ञानंविनाकर्तुं-शक्यते अत: नि:सन्देहकथयितंशक्यते यत्मदालस-ासदृशीराजमाताराजनीतौविशारदासीत्। स्कन्दपुराणेवर्णनंप्राप्यतेयत्कुमारीनायिकाएकाराजकन्यायैतस्या:–पितास्वपुत्रसमानंराज्यभागंप्रदानमकरोत्

**अनिच्छन्त्यांकुमार्यांचवरंद्रव्यंचपार्थिव:।**
**तथान्यदपिप्रीत्यासौयद्ददौनृपति:शृणु।।**
**इदंभारतखण्डंचनवधैवविभज्यस:।**
**ददावष्टौस्वपुत्राणांकुमार्यैनवमंतथा।।**

अनिच्छन्त्यापिकुमार्याराजास्वपुत्रींराज्यकरणयोग्यामत्वाराज्यस्यैकभागं-पुत्रीकृतेदश्रवान्। भ्रातरोपिस्वराज्यविभाजनायकुमारी-सकाशादानुरोधंकृतवन्त:–

**खण्डोत्र्वेनद्रव्येणतपेदानानियच्छती।**
**तत:केनापिबालेनभातृभ्योष्टाभ्यएवच।।**

एतत्वार्ताअवश्यमेवसिद्ध्यतियत्शासनयोग्यताकुमरीषुसमभवत्तथाचता:–राजनिज्ञा:-आसन्। एतेषांसर्वेषांपूर्वदृष्टप्रमाणानांविश्लेषणेन-नि:सन्देहमेतत्वक्तुंशक्यतेयत्पुराण-कालेऽपिनारी-णांराजनैतिक-कार्येषुभागा-दानस्यशासनकरणस्ययुद्धादिषुयथा-समयेभागग्रहणस्यपुत्राणांपत्येःराज्यकर्मणिमन्त्रणादानस्यचपूर्णस्वातन्त्र्यमासीत्।

पऽपुराणेऽपितारावाराराामेणसहकथोपकथनप्रसंगोऽपिराजनीतै:-उदाहरणंश्रेष्ठतरंप्राप्नोतिकिष्किन्धायांबालि-नामकेतारापतौहतेसतितारारामंप्रतिकथयतियत्हेराम! भवन्तंराजधर्मस्यज्ञानंनवर्तते–

**नक्षत्रधर्मनजानीषेराजगणसेवितं।**
**अन्योन्यंयुद्धयतोर्युद्धेजयोयामरणंभवेत्।**
**अन्योयदितयोर्हन्यात्ब्रह्महासनिगद्यते।।**

अनेन्पऽपुराणस्यप्रमाणेनज्ञायतेयत्ताराराजनीतिज्ञाआसीत्। पुराणकालेराजनीते:-शिक्षाया:प्रचलनंसम्भाव्यते।

यद्यपिप्रस्फुटंविशदंचविवरणंपुराणसमयेनोपलभ्यतेतथापिएतादृश्यो-वीराङ्गना:सन्तियाश्चस्वपुत्राणां-पतीनाञ्चकृतेराज-धर्मस्यशिक्षायैप्रदायसमयेसमयेचतान्प्रबोधयन्प्रोत्साहितवत्य:च। मार्कण्डेयपुराणेकरन्धमस्यपत्न्यावीराया:प्रसङ्गोप्राप्यते। तथाहियदावीराया:पुत्र:अवीक्षितविशालनगरस्यस्वयंवरेराजभि-:परावृत्यवन्दीकृतस्तदावीरा-स्वपतिकृतेराजधर्मस्यक्षात्रधर्मस्यच-परिचयंप्रदायपुत्रकृतंकार्यंप्रशंसयचशत्रून्प्रतियुद्धाय-स्वपतिंकरन्धमंप्रेषयामास।

अनेन्आख्यानेन्ज्ञायतेयत्वीराऽपिराजनीतिज्ञाशिक्षाशान्त्रप्रवीणाचासीत्। स्कन्दपुराणेऽपिएकोपोख्यानम्प्राप्नोति-काशिराज्ञ:पुत्रीकलावतीस्वपतिंदाशार्हंप्रतिकथयतियन्मह्य-ंमहर्षिदुर्वासाबाल्यकालादेवपञ्चाक्षरंमन्त्रंप्रादात्–

**राजन्! ममपुराकल्पेदुर्वासामुनिपुङ्गय:।**
**शैवींपञ्चाक्षरींविद्यांकारुण्येनोपदिष्टवान्।।**

अनेनिश्चेतुंशक्यतेयत्अन्यकालापेक्षयापुराणकालेनार्यो-राजनीतौभागंनयन्तिस्मतथाराज्यशासन-सम्बन्धिप्रत्येक-प्रतीकोपरितासांविशेषज्ञानमासीत्। राजनीतिसम्बन्धेतासांकृते-समुचितशिक्षाऽपिप्राप्तासीत्।

# उपकारी चोर:

कस्मिंश्चित् नगरे कश्चन चोर: आसीत्। स: चौर्ये अतीव निपुण:।

एकदा चत्वार: पण्डिता: तद् नगरम् आगतवन्त:। पण्डितानां सविधे अधिकं धनम् आसीत्। तद् धनम् अपहरणीयम् इति चोर: चिन्तितवान्। अत: स: तेषां स्नेहं स्म्पादितवान्। किन्तु पण्डिता: सर्वं धनं दत्त्वा बहुमूल्यानि रत्नानि क्रीतवन्त:। तानि रत्नानि कोषे स्थापयित्वा तत: ते प्रस्थितवन्त:।

तदा चोर: चिन्तितवान्–'अहम् अपि एतै: सह गच्छामि। मार्गे कुत्रापि एतेषां वधं कृत्वा रत्नानि अपहरिष्यामि' इति। अत: स: तान् उक्तवान्–''भो: पण्डिता:। अहं भवभ्दि: विना जीवितुं न शक्नोमि। अत: भवभ्दि: सह एव आगच्छामि, कृपया अनुमतिं यच्छन्तु'' इति। पण्डिता: एतत् अङ्गीकृतवन्त:। अनन्तरं ते सर्वे तत: प्रस्थितवन्त:।

मार्गमध्ये अरण्यम् आसीत्। तत्र किराता: वासं कुर्वन्ति। किरातवसतौ कश्चन काक: आसीत्। स: विचित्रशाक्तिमान्। मार्गे ये गच्छन्ति तेषां सविधे धनम् अस्ति चेत् स: जानाति। किरातान् सूचयति च। इदानीं पण्डितान् दृष्ट्वा काक: स्वभाषया किरातान् उक्तवान्–''रे किराता:! धावन्तु, एतेषां पण्डितानां सविधे धनम् अस्ति। तद् भवन्त: वशीकुर्वन्तु'' इति।

तदा पण्डिता: रत्नरक्षणार्थम् एकम् उपायं चिन्तितवन्त:। ते रत्नानि गीर्णवन्त:। किराता: काकस्य वचनं श्रुत्वा पण्डितान् वद्धवन्त:। तेषां वस्त्राणि निष्कास्य सर्वत्र अन्विष्टवन्त:। परन्तु धनं न लब्धम्। तदा किराता: उक्तवन्त:–''भो:! धनम् अस्ति एव। तत् यच्छन्तु। नो चेत् सर्वेषां वधं कृत्वा चर्म विदार्य प्रत्यङ्गम् अन्वेषणं कुर्म:'' इति।

किरातानां वचनं श्रुत्वा चोर: चिन्तितवान्–'यदा एते पण्डितानां वधं कृत्वा शरीरे अन्वेषणं कुर्वन्ति तदा रत्नानि लभ्यन्ते। तदा मम शरीरे अपि रत्नं स्यात् इति ममापि वधं कुर्वन्ति एव। अत: अहं प्रथमं मम बधं कर्तुं वदामि। मम शरीरे तु रत्नं नास्ति। तद् ज्ञात्वा किराता: पण्डितान् मुञ्चन्ति। मम प्राणार्पणेन पण्डितानां रक्षणं भवतु' इति।

अनन्तरं स: उक्तवान्–''भो: किराता:! अस्माकं सविधे धनं किमपि नास्ति। तथापि संशय: अस्ति चेत् मम वधं कृत्वा पश्यन्तु'' इति। किराता: चोरस्य वधं कृतवन्त:। शरीरे सर्वत्र अन्वेषणं कृतवन्त:। परन्तु कुत्रापि धनं न लब्धम्।

तदा ते काकस्य वचनम् एव असत्यं स्यात् इति चिन्तयित्वा क्षमायाचनं कृत्वा तान् पण्डितान् सगौरवं तत: प्रेषितवन्त:।

(पञ्चतन्त्रकथाया साभार:)

# अलिविलासिसंलापस्य महाकाव्यत्वम्

-हिमांशुरावतः
शोधच्छात्रः, वनस्थलिविद्यापीठम्

संस्कृतजगति साहित्यशब्दस्य किमपि विशिष्टं स्थानं वरीवर्तते। साहित्यशब्दस्य सर्वप्रथमं वेदेषु अर्थः सम्यग् घटते यतो हि संस्कृतवाङ्मयस्य प्रारम्भः वैदिककालादेव वर्तते। अतः सर्वप्रथमं वैदिकसाहित्यमनन्तरं च लौकिकं साहित्यमिति। जगति मानवमात्रस्य मेधा एव त्रैकालिकं घटनाचक्रमभिज्ञातुं सक्षमा। पुरा ऋषिभिः वैदिकमन्त्राणां निदिध्यासनेन हितकरं कार्यं क्रियते स्म। तेष्वेव मन्त्रेषु सम्पूर्णज्ञानविज्ञानस्य अपरिमितं समावेशो वर्तते। वैदिकसाहित्ये ऋक्-यजु-साम्-अथर्वभेदेन चत्वारो वेदाः, सूत्रगन्थाः, ब्राह्मणग्रन्थाः उपनिषदास्तथा सन्ति।

वैदिकसाहित्यानन्तरं लौकिकसाहित्यम्। तत्र लौकिके सर्वप्रथमं महाकविवाल्मिकिविरचितं रामायणं वर्तते, तदनन्तरं महाभारतमुभौ च लौकिकसाहित्यस्य उपजीव्यत्वेन वर्तते। प्रायेण कवयः कथानकं रामायणं महाभारतं वा आश्रित्यैव स्वीकुर्वन्ति। लौकिकसाहित्यस्य स्वकीयं किमप्यद्वितीयं वैशिष्ट्यं वर्तते। लौकिकसाहित्ये वेदोपनिषत्सु गृहीतं ज्ञानं सरलभावगम्यत्वेन प्रतिपाद्यते। लौकिकसाहित्यस्य अपि पृथक्-पृथक् स्वरूपं वर्तते।

तत्र सर्वप्रथमं गद्य-पद्य-मिश्रभेदेन त्रिविधं विभजते। सर्वप्रथमं काव्यस्य गद्यविधामुररीकृत्य कथा आख्यायिका च द्विधा सुप्रसिद्धमेव। कथाऽख्यायिकयोः स्वकीयं पृथक् महत्त्वं वर्तते। द्वावेव गद्येन विनिर्मिता अत्यन्ताह्लादकारिणी भवति।

लौकिकसाहित्यं काव्य इति शब्दव्यवहारेण सुप्रसिद्धोऽस्ति यतः कवि द्वारा प्रतिभाऽभ्याससशास्त्राद्यध्ययनेन काव्ये सरसविषयवस्तुनः चमत्कारित्वेनोपस्थापनं क्रियते। तत्र न केवलं कविः रसास्वादेच्छया यादृच्छकं वस्तुविषयमुपन्यस्यत्यपितु किमपि विशिष्टार्थानुसृत्य काव्ये सकलब्रह्माण्डोपयोगिनं ज्ञानं सारस्येन सारल्येन च समावेशयति। काव्यं कवेः किमप्यलौकिकं विषयोपस्थापनं यस्मिन् परस्परं शब्दार्थयोः लौकिकविषयमलौकिकरुपेण भानुकर इव लोकत्वादप्यलौकिकत्वमुपस्थापयति। तस्येव काव्यस्योपकारकत्वेन काव्यशास्त्रमपि विद्वद्भिः अनुशासितम्। काव्यादर्शकारेण काव्यादर्शे शास्त्रस्य वैशिष्ट्यं प्रदर्शितम् -

"गुणदोषानशास्त्रज्ञः कथं विभते जनः।
किमन्धस्याऽधिकारोऽस्ति रुपभेदोपलब्धिषु।।"[1]

तथाभूतस्य अलौकिकचमत्कारेणावच्छिन्नकाव्यस्य काव्यशास्त्रविचक्षणैः सर्वप्रथमं द्वौ भेदौ प्रतिपादितौ दृश्यकाव्यं श्रव्यकाव्यञ्च। उक्तञ्च -

"दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।
दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रुपकम्।।"[2]

दृश्यकाव्यस्य स्वकीयं विशिष्टं महत्वं वर्तते। सुप्रसिद्धमेतत् "काव्येषु नाटकं रम्यम्" इति। आङ्गिक-वाचिक-सात्विक-आहार्यादिचतुर्विधाभिनयेन दृश्यमत्यन्तं रमणीयकारकं भवति। कस्य चित् नायकस्य रुपस्य आरोपात् तद्रूपकमित्युच्यते। दृश्यकाव्यस्य बृहत्तरं साहित्यं दश रुपकाणि अष्टादश उपरुपकाणि च सन्ति। आहत्य अष्टाविंशति रुपकोपरुपकाणि काव्यशास्त्रिभिः निर्दिष्टानि सन्ति। सर्वेषु अभिनयस्यैव प्राधान्यम्।

दृश्यकाव्यादनन्तरं श्रव्यकाव्यं काव्यस्य द्वितीयं प्रकारं वर्तते। वस्तुतः लौकिकसाहित्यस्य प्रारम्भकाव्यस्य श्रव्यप्रभेदादेवारभते। श्रव्यकाव्येषु आदिकाव्यं रामायणं महाभारतञ्च वर्तते। द्वावेव आर्षप्रणीतौ महाकाव्यौ स्तः। अतः द्वाभ्यामुररीकृत्येव कवयः कथानकं स्वीकुर्वन्ति तथा स्वप्रतिभया काव्ये अप्रतिमं चारुत्वं समायोजयति। तथाभूतं चारुत्वावच्छिन्नं काव्यं कमप्यलौकिकास्वादेन इतरविषयावच्छेदकत्वेन सहृदयानां हृदयं हितभावेन परिपोषयति। तदैव काव्यं साहित्यपदाभिधानेन निर्वचनीयमिति।

इत्थं साहित्यशब्दस्य अर्थः व्यापकतामेति। तस्य अर्थव्यापकत्वमिव वाङ्मयोऽपि अधुनापर्यन्तमुत्तमोत्तमरुपेणावहति। लौकिकसंस्कृतस्य जगति सुप्रसिद्धमेतत् कवेः सृष्टिः नियमवर्जिता तथा काव्यशास्त्रस्य ध्वनिसिद्धान्तस्य प्रवर्तकाचार्येण मुक्तकण्ठेन उद्घोषितम् -

"अपारे काव्यसंसारे कविरेकप्रजापतिः।
यथेस्मै रोचते विश्वं तथेदं परिवर्तते।।"[3]

तस्यैव मतानुसारिणा आचार्यमम्मटेनाऽपि काव्यप्रकाशस्य मङ्गलाचरणे कविसृष्टेः जयमुदीरितम् -

"नियतिकृतनियमरहितामाह्लादेकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति।।"[4]

उभे श्लोकद्वये कवेः कामपि विशिष्टां स्थितिं सम्मुखी कुरुतः। आनन्दवर्धनाचार्येण सम्पूर्णकाव्यसंसारस्य कवि एकः प्रजापतीत्युद्घोषितं तत्र प्रजापति इति विशेषण पदस्य अस्ति काऽपि विशिष्टता यामाधारिकृत्य कवि तस्य सृष्टिं विसृजति। या च सृष्टिः सा विधिनिर्मितसृष्ट्या परा केवला कविराश्रिता इति। तस्यैव सुरुचिरसृज्टिनिर्माणकर्तृत्वात् कविः तस्य सृष्टेः एकमात्रं प्रजापतीति।

अपरस्मिन् मङ्गलाचरणे आचार्यमम्मटेन नियतिकृत्सृष्टेः अध मत्वं तथा कविसृष्टेः उत्कृष्टत्वं प्रतिपादितम्। कवेः सृष्टिनियमरहितत्वादपि कानिचन नियमान्युपायन्ति। तत्र विधि कष्टतत्वनियमानामनुपालन विध्यानुरुपेण न क्रियते अपितु कवेरभिप्रायेण अपरैव स्वनियमान्यनुपालयित्री नवरसारुचिरासृष्टिः सहृदयहृदयान् आह्लादयति। तस्यामेव सृष्टौ कवि प्रतिभाऽभ्यासादिमाध्यमेन लोकोत्तररुपेण हितभावं सद्यपरनिवृत्तत्वेन योजयति। अनेन प्रकारेण कवि द्वारा विरचितेषु काव्येषु लोकोपकारकत्वं अनेकाऽनेकप्रकारेण प्रतिपदं वर्णितं च भवति। तथाविधविरचितां काव्यानां वाङ्मयः साहित्यवाङ्मयेन सहृदयेषु सुप्रसिद्ध एव। तस्यैव लौकिकसाहित्यस्य प्रारम्भः महर्षिवाल्मीकेः रामायणमिति आदिकाव्यात् प्रारभते।

संस्कृतसाहित्ये महाकाव्यरचनायाः परम्परा अतीव दीर्घा गौरवान्विता च वर्तते। रामायण-महाभारत-रघुवंश-कुमारसम्भव-किरातार्जुनीय-जानकीहरण-नैषध - शिशुपालवधप्रभृतीनि महाकाव्यानि संस्कृतसाहित्यस्य गौरवशिखराणि वर्तन्ते। एतानि सुप्रसिद्धानि मनोहराणि महाकाव्यानि सन्ति। काव्यशास्त्रेषु महाकविभामहादारभ्य प्रायः समेऽपि आचार्याः महाकवयः स्वशास्त्रे महाकाव्यस्य लक्षणं प्रदर्शितवन्तः। यत्र साहित्यदर्पणकारस्य पं.विश्वनाथस्य महाकाव्यलक्षणं समस्तप्राचामाचार्याणां हार्दमुपस्थापयति। पं. विश्वनाथस्य महाकाव्यलक्षणं वर्तते -

"सर्गबन्धो महाकाव्यम्"

अयमभिप्रायो यत् सर्गबद्धरचना महाकाव्यमित्यभिधीयते। एकस्मिन्नेव वंशे समुत्पन्नाः राजानो महाकाव्ये नायकाः भवन्ति। अत्र च महाकाव्ये श्रृंगारवीरशान्तरसेषु अन्यतमः कश्चन एको रसोऽङ्गीरसत्वं भजते, अन्ये च सर्वे अङ्गभूताः भवन्ति। महाकाव्यस्य इतिवृत्तं प्रख्यातं भवति, अत्र न्यूनातिन्यूनाः अष्टौ सर्गाः, सर्गान्ते च प्रारम्भ्यमाणसर्गस्य सूक्ष्मवर्णनम्, प्रकृतिवर्णनादिमहाकाव्योपयोगित्वगुणाः नितान्तं भवितव्याः।

पं.विश्वनाथेन महाकाव्यलक्षणमिदं तदानीन्तन आदर्शभूतमहाकाव्यानुगुणं वर्तते। वस्तुतस्तु महाकाव्यस्य नियामकत्वं सर्गाणां धीरप्रशान्तादिनायकानामाश्रितं न स्यादपितु तस्यैव महाकाव्यत्वे आश्रितं भवितव्यम्। अभिनवकाव्यालङ्कारसूत्रकाराः आचार्यराधावल्लभत्रिपाठिनः समग्रजीवननिरूपणपरां रचनां महाकाव्यत्वेनाङ्गीकुर्वन्ति। उक्तञ्च त्रिपाठिना -

"पद्यात्मकं समग्रजीवननिरूपणपरं महाकाव्यम् "[5]

त्रिपाठिनोऽनुसारं महाकाव्यमेव कवित्वस्य पराकाष्ठामुल्लङ्घयति। रामायणमहाभारतादीनि पाश्चात्याचार्यैः रचिताश्च ग्रन्थाः महाकाव्यकोटौ परिगणिताः आचार्यैः। अलिविलाससंलापः सर्गदृष्ट्या विषयवस्तुदृष्ट्या च विश्वनाथाभिमतं काव्यलक्षणं लक्षयति, किन्तु नायकदृष्ट्या तु महाकाव्यत्वं न भजते। अस्य महाकाव्यस्य नायकः प्रत्यक्षरूपेण कश्चन भ्रमरो वर्तते, परं सः भ्रमरः परंहंसः, जीवः, गुरुः, ब्रह्म अपि वर्तते। सम्भवतः कविना अस्य नायकं संवीक्ष्यैव खण्डकाव्यत्वमुक्तम्।

वस्तुतस्तु नायकदृष्ट्या अपि अस्य महाकाव्यत्वहानिः नोचिता यतः आधुनिकैः महाकविभिः सीतासावित्र्यादिभिः तथा च कतिपयक्षुद्रनायकाणामाधारेणापि महाकाव्यानि रचितानि। एतैः कविभिः एतेषां महाकाव्योचितनायकत्वं दृष्ट्वैव नायकत्वेन चिताः स्युः। यथोदाहरणरूपेण वयं सीताचरितम्, जानकीचरितम्, भीमायनम्, दलितोदयम् इत्यादीनि महाकाव्यानि स्थापयितुं प्रदर्शयितुं च शक्नुमः।

मदीयदृष्ट्या तु अलिविलासिसंलापस्य महाकाव्यत्वमव्याहतमस्ति। महाकाव्यस्यास्य नायकः अलिः, चरमपुरुषार्थस्य प्रतीकोऽस्ति। काव्येऽस्मिन् शान्तरसस्य प्रधानता अस्ति। प्रथमशतके तृतीयशतके च प्राकृतिकसौन्दर्यस्य वर्णनम्, पञ्चमशतके भारतस्य पुण्यतीर्थानां वर्णनम्, तथा चान्ते मोक्षप्राप्तिदृष्ट्या अलेः समग्रजीवनस्य निरूपकरूपेण गृहीतुं शक्यते। कविना स्वयमेव खण्डकाव्यरूपेण स्वीकृतम्, अतः तेषामुदारता एव, वस्तुतः काव्येदं महाकाव्यवदेवाऽस्ति इत्यस्मिन् विषये नास्ति कोऽपि सन्देहः।

**(Footnotes)**

1 काव्यादर्श १.८
2 सा.द ६.१
3 ध्वन्यालोक १
4 का.प्र. १.१
5 अ.का.सू. ३.१.३




## पाठकानां कृते सूचनाः-

कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्कं रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-

**Sanskrit samvad,**
**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar, Delhi-110053**
**IFC Code- IOBA0002249**

# गायत्रीमन्त्रस्य जपविधिरक्षरसंख्याविचारश्च

- धनीरामकौशलः

न गायत्र्याः परो मन्त्रः। अर्थाद् गायत्रीमन्त्रात् श्रेष्ठः कोऽपि मन्त्रो नास्ति। सन्ध्योपासनस्य गायत्रीमन्त्रस्य च जपो न केवलं ब्राह्मणस्य कृते परमावश्यकः कर्त्तव्यो वर्तते अपितु त्रैवर्णिकस्य (ब्राह्मण–क्षत्रिय–वैश्यानाम्) कृतेऽपि परमावश्यकोऽस्ति। संसारे सन्ध्योपासनं विना यानि यानि नित्य–नैमित्तिकानुष्ठानानि च भवन्ति, तेषां किमपि फलं नास्ति।

गायत्री तु ब्राह्मणाय सुरक्षा–कवचोऽस्ति। गायत्री–जपेन हि ब्रह्मतेजसः प्राप्तिर्जायते, यस्य सम्मुखे सर्वे नतमस्तका भवन्ति। अस्मिन् क्षणे सर्वाधिकमाक्रोशम् आक्रमणं च ब्राह्मणानामुपरि प्रचलति तथा च ब्राह्मणोऽपि स्वकर्त्तव्यात् च्युतो भूत्वा स्व–सहजशक्तिं ह्रासयति। इदानीं तु ब्राह्मणस्य कृते सावध ानतया स्वकर्त्तव्यं पालनीयं तथा च स्वीकीयां क्षतिग्रस्तामूर्जामिते पुनः संस्थापयन्तु, अन्यथा एतेषां केवलम् अपमानं हि अपमानं भविष्यति, परन्तु एते किमपि न करिष्यन्ति।

अत्र गायत्रीमन्त्रस्याक्षरसंख्यानां विवेचनं जपविधेर्नियमं च प्रस्तौमि। अथ गायत्री–मन्त्रः प्रस्तूयते–

**ओउम् भूर्भुवः स्वः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।**[1]

गायत्रीमन्त्रस्य प्रथमपादे 'वरेण्यम्' पदमस्ति। गायत्रीजपकारिणां जपसमये 'वरेणियम्' तथा वेद–पारायणादिकाले 'वरेण्यम्' हि पाठः पठनीयः। यथा– वृद्धयोगियाज्ञवल्क्य–स्मृतौ कथितम्–**पाठकाले वरेण्यं स्याज्जपकाले वरेणियम्।**

छन्दोबद्धेषु वैदिकमन्त्रेषु यत्रैकाक्षरस्य न्यूनता जायते, तत्र 'इ' अथवा 'उ' इति स्वराक्षरेणाक्षरसंख्यायाः पूर्तिः क्रियते। इयं तु वैदिकपरम्परा वर्तते। वैदिकसम्प्रदायस्य मुख्याधारः पिङ्गलाचार्येण कृतं छन्दःसूत्रमिति। पिङ्गलाचार्येण स्वकीयच्छन्दःसूत्रस्य तृतीयेऽध्याये 'इत्यादि पूरणः' सूत्रं लिखितम्। यस्य निष्कर्षस्तु यत्राक्षरसंख्या पूर्णा न भवति, तत्र 'इय्' तथा 'उव्' संयोगेनाक्षर–संख्या–पूर्तिः भवति। तद्यथा–

**तत्सवितुर्वरेणियम्।**[2]

**दिवं गच्छ सुवः पत।**[3]

अत्र 'स्व' इत्यस्य स्थाने 'सुव' इति पठित्वा 'उव्'–माध्यमेनाक्षरसंख्या–पूर्तिः भवति। तथैव गायत्री–मन्त्रेऽपि 23 अक्षराणि सन्ति, यदा तु गायत्र्याः पादत्रयेषु 8+8+8=84 अक्षराणि भवेयुः। अत एकाक्षरस्य वृद्धिहेतोः 'इय्' इति संयोज्य 24 अक्षराणि भवन्ति।

आचार्येण शौनकेनाक्षरसंख्याया वृद्धिहेतोरुक्तमस्ति

**व्यूहेदेकाक्षरीभावान् पादेषूनेषु सम्पदैः।**

**क्षैप्रवर्णांश्च संयोगात् व्ययेयात् सदृशैः स्वरैः।।**[4]

**पादपूरणार्थन्तु क्षैप्रसंयोगैकाक्षरीभावान् व्यूहेत्**[5]

भाष्यानुसारेण क्षैप्रसंयोगस्यार्थस्तु यकारस्य वकारस्य च संयोगः। एतत्तु यण्सन्धेः संयोगोऽपि कथ्यते। यण् (य,र,ल,व) इत्यादीनां संयोगो हि 'क्षैप्र' इत्युच्यते। येन शीघ्रं हि एकमात्राम् अर्द्धमात्रां कृत्वा क्षिप्रं (शीघ्रम) अल्पकाले वक्तुं शक्यते। यथा हि–

इति + आदि – इत्यादि

अति + अधिक – अत्यधिकः

दधि + अत्र – दध्यत्र।

'एकः पूर्वपरयोः' इत्यनेन पाणिनिसूत्राधिकारेण[6] एकाक्षरीभावस्यार्थस्तु सवर्णदीर्घव्यूहः गुणसन्धिव्यूहः, वृद्धिसन्धि व्यूहः, पूर्वसवर्णसन्धिव्यूहश्च। सन्धिर्हि एकाक्षरी–भावना परिगण्यते।

यदा कस्यापि मन्त्रस्य छन्दसः पूर्तौ अक्षरस्य न्यूनता भजते, तदा उक्तस्यैकाक्षरीभावसन्धेर्विच्छेदं कृत्वा संख्यापूर्तिः भवति। यथा च–

(1) यण्व्यूहः– पर्योजः, परियोजः।

(2) सवर्णदीर्घव्यूहः– अधिकाधिकः (अधिक अधिकः)

(3) गुणव्यूहः – उपेन्द्रः (उप इन्द्रः) (महेन्द्रः महा इन्द्रः)

(4) वृद्धिव्यूहः– ब्रह्मैतु, ब्रह्म एतु। सदैव, सदा एव।

(5) पूर्वसवर्णव्यूहः–इन्द्रवाजेषु नोऽव[7]। नोऽव (नो अव) मनोभिलाषितः (मनो अभिलाषितः)

एवम्भूतं यथा संहिताभागगतानां मन्त्राणामक्षरसंख्यापूर्तिहेतोरुक्तो नियमो विहितः, तथैव ब्राह्मणभागस्यापि छन्दसामक्षर–संख्यापूर्तिर्भवति। शतपथब्राह्मणस्य सप्तमकाण्डे द्वादशकाण्ड च बृहतीछन्दसः पूर्तिहेतोः स्पष्टश्रुतिरस्ति। तद्यथा–**नाक्षराच्छन्दो व्येति। एकस्मान्न द्वाभ्याम्। स उ द्व्यक्षरस्तत् षट्त्रिंशत्, षट्त्रिंशदक्षरा बृहती।**[8]

जपविधौ 'वरेणियम्' इति कथने यदि काऽपि आपत्तिः, कोऽपि आक्षेपो वा भवति, तदा वयं वक्तुं शक्नुमः यतो हि 'वृञ्' धातोः वृञ् एण्यः' अनेन औणादिकसूत्रेण 'एण्ड–प्रत्ययसंयोगेन व्याकरणशास्त्रानुसारेण च 'वरेण्य' शब्द निष्पन्नोऽस्ति। तस्य स्थाने यदि 'वरेणियम्' इति पठनं भवति तर्हि शब्दोऽयम् अपशब्दः, असाधुः (अशुद्ध) शब्दो वा भविष्यति तथा तत्र छन्दोभङ्गदोषो भविष्यति एवं न। अविच्छिन्न–सम्प्रदायपाठः सर्वदा शुद्धो वर्तते। वेदेषु सम्प्रदाय–प्रमाणं सर्वोपरि स्वीक्रियते। सम्प्रदाय–पाठे ईदृशी आशङ्का मा करणीयार।

सन्दर्भेऽस्मिन् याज्ञवल्क्येन स्वकीय–याज्ञवल्क्यस्मृतो चतुर्थेऽध्याये स्पष्टरूपेणाच्येते यत्–

**चतुर्विंशति–तत्त्वानि ओङ्कारः पञ्चविंशकः।**

**चतुर्विंशाक्षरा देवी त्रिपदष्टाक्षरं पदम्।।**

**गेयकाले सामगानां यकारोऽस्याः प्रजायते।**

**चतुर्विंशः स विज्ञेयः अलक्ष्यः शान्तिरस्तु वः।।**

**तेनैवारभ्यते देवी तेनैवैषा समाप्यते।**

**वेदेषु पठ्यते चान्या जपकालेऽन्यथा पुनः।**[9]

जपविधिः–

गायत्री–मन्त्रस्य जपविधानात् पूर्वं षडङ्गन्यासः सदैव कर्त्तव्य। यथा–

1. **ॐ हृदयाय नमः** (दक्षिणहस्तस्य पञ्चभिरङ्गुलिभिः हृदयस्य स्पर्श कुर्यात्)
2. **ॐ भूः शिरसे स्वाहा** (मस्तकस्पर्शं कुयात्)
3. **ॐ भुवः शिखायै वषट्** (अंगुष्ठेन शिखास्पर्शं कुर्यात्)
4. **ॐ स्वः कवचाय हुम्** (दक्षिणहस्तस्याङ्गुलिभिः वामभुजां तथा वामहस्त–स्याङ्गुलिभिः दक्षिणभुजां स्पृशेत्)
5. **ॐ भूर्भुवः स्वः नेत्राभ्यां वौषट्** (नेत्रद्वयस्पर्शं कुर्यात्)
6. **ॐ भूर्भुवः स्वः अस्त्राय फट्।** (दक्षिणहस्ततर्जनीमध्यमाभ्यां तालिकाद्वयं दद्यात्)

**गायत्र्या आवाहनम्–**

सर्वप्रथम विनियोगस्य विधिः, ततः परमावाहनम्। अथ विनियोगः कथ्यते–

तेजोऽसीति धामनामासीत्यस्य च परमेष्ठी प्रजापतिः ऋषिर्यजुस्त्रिष्टुब्बुष्णिहौ छन्दसी आज्यं देवता गायत्र्यावाहने विनियोगः।

**'ॐ तेजोऽसि शुक्रमस्यमृतमसि। धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि।'**[10] गायत्रीदेव्या उपस्थानम् (प्रणामः)

गायत्र्यसीति विवस्वान् ऋषिः स्वराण्महापङ्क्तिश्छन्दः परमात्मा देवता गायत्र्युपस्थाने विनियोगः।

**ॐ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि। न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसेऽसावदो मा प्रापत्।**[11]

–बृहदारण्यकम्–5/14/7

**जपात् पूर्वं चतुर्विंशतिमुद्राः सन्ति। यथा–**

**सुमुखं सम्पुटं चैव विततं विस्तृत तथा।**

**द्विमुखं त्रिमुखं चैव चतुष्पञ्चमुखं तथा।।**[12]

**षण्मुखाऽधोमुखं चैव व्यापकाञ्जलिकं तथा।**

**शकटं यमपाशं च ग्रथितं चोन्मुखोन्मुखम्।।**

**प्रलम्बं मुष्टिकं चैव मत्स्यः कूर्मो वराहकम्।**

**सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवं तथा।।**

**एता मुद्राश्चतुर्विंशज्जपादौ परिकीर्तिताः।।**[13]

ततः परं गायत्रीमन्त्रस्य विनियोगं पठित्वा जपं कुर्यात्। जपात् परमष्टमुद्राः सन्ति। यथा–

**सुरभिर्ज्ञानवैराग्ये योनिः शंखोऽथ पङ्कजम्।**

**लिङ्गनिर्वाणमुद्राश्च जपान्तेऽष्टौ प्रदर्शयेत्।।14**

**जपस्यार्पणम्–**

सर्वप्रथमं सूर्य–प्रदक्षिणा ततः परं भगवते जपस्यार्पणं कर्तव्यम्।

**सूर्य–प्रदक्षिणा–**

सूर्य–प्रदक्षिणा निम्नप्रकारेण कर्तव्या। यथा–

**यानि कानि च पापानि जन्मान्तरकृतानि च।**

**तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे।।**[15]

अनेन गायत्रीजपकर्मणा सर्वान्तर्यामी भगवान् नारायणः प्रीयतां न मम।

**अथ विसर्जनम्–**

उत्तमे शिखरे इत्यस्य वामदेव–ऋषिरनुष्टुप्छन्दः गायत्री देवता गायत्रीविसर्जने विनियोगः।

**उत्तमे शिखरे देवी भूम्यां पर्वतमूर्धनि।**

**ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि! यथासुखम्।।**[16]

जप–विधिः (पुरश्चणदीपिका)

**अङ्गुष्ठं मोक्षदं विद्यात् तर्जनी शत्रुनाशिनी।**

**मध्यमा धनदा शान्ति–करा चैषा ह्यनामिका।।**[17]

अर्थात् दक्षिणहस्तस्याङ्गुष्ठेन यदि जपं करोति तर्हि मोक्षस्य प्राप्तिर्भवति, तर्जन्या शत्रुनाशः, मध्यमया धनस्य प्राप्तिः, अनामिकया च शान्तिप्राप्तिर्भवति।

**कनिष्ठाऽऽकर्षणे शक्ता जपकर्मणि शोभने।**

अर्थात् कनिष्ठिकयाऽङ्गुल्या यदि जपं करोति।[18] तर्हि आकर्षणशक्तेः फलं समुपलभ्यते।

**अङ्गुष्ठेन जपं जप्यम् अन्यैरङ्गुलिभिः सह।**

**अङ्गुष्ठेन विना कर्म कृतं तु विफलं भवेत्।।**[19]

अर्थात् आभिरङ्गुलिभिः सह अङ्गुष्ठेन जपः करणीयः। अङ्गुष्ठं विना कृतं कर्म निष्फलं वर्तते। यथा–

**स्वयं वामेन हस्तेन जपमालां न संस्पृशेत्।**

**अदीक्षितो द्विजो वापि स्पृष्टश्चेच्छुद्धिमाप्नुयात्।।**[20]

आत्मना वामहस्तेन जपमालां गोमुखीञ्च न स्पृशेत्। अस्यां स्थितौ कस्यापि अदीक्षितस्य (दीक्षारहितस्य) द्विजस्य (सुसंस्कृत–त्रैवर्णिकस्य ब्राह्मणस्य वा) स्पर्शेन शुद्धिप्राप्तिर्भवति।

**न धारयेत् करे मूर्ध्नि कण्ठे च जपमालिकाम्।**

**जपकाल जपं कृत्वा सदा शुद्धस्थले न्यसेत्।।**[21]

अत्रायं सारो यत् जपमालिकां कण्ठे (शिरसि) हस्ते वा न धारयेत्। जपकाले जपं कृत्वा मालिकां सदैव पवित्रस्थाने स्थापयेत्।

**गुरुं प्रकाशयेद् धीमान् मन्त्रं नैव प्रकाशयेत्।**

**अक्षमालां च मुद्रां च गुरोरपि न दर्शयेत्।।**[22]

अर्थात्, बुद्धिमान् पुरुष आवश्यकतानुसारेण गुरोः परिचयं प्रकाशयेत्, परन्तु स्वमन्त्रं नैव प्रकाशयेत्। अक्षमालां (जपमालां) मुद्राञ्च (योनिमुद्रा) गुरोः समीपेऽपि न प्रदर्शयेत्।

**कम्पनात् सिद्धिहानिः स्याद् धूननं बहुदुःखकृत्।**

**छिन्ने सूत्रे भवेन्मृत्युस्तस्माद् यत्नपरो भवेत्।।**[23]

अत्रायमभिप्रायो यद् जपसमये जपमालायाः वारम्वारं कम्पनं धूननञ्च न कुर्यात्। यतो हि तस्याः कम्पनात् सिद्धिहानिर्जायते तथा च धूननात् बहुदुःखप्राप्तिर्भवति। मालिकायाः सूत्रच्छेदनं हि मरणस्य सूचकमस्ति। अतः यत्नपूर्वकं जपमालां स्थापयेत्।

**वस्त्रेणाच्छादितकरे दक्षिणे यः सदा जपेत्।**

**तस्य स्यात् सफलं जप्यं तद्धीनमफलं भवेत्।।**[24]

अपि च–

**भूतराक्षसवेतालाः सिद्धगन्धर्वचारणाः।**

**हरन्ति प्रकटं यस्मात् तस्मात् गुप्तं जपेत् सुधीः।।**[25]

### सन्दर्भ–सूची


1. – शु.यजुर्वेदः 36/3 २. – शु. य. ३/९

३. – शु.य. १२/४ ४. ऋक्–प्रातिशाख्ये (२७/३६)

५. – स.अनु १/३ ६. (पा.सू. ६/९/८४)

७. (ऋ.सं. १/१/१३/४

८. – शतपथब्राह्मणम् ७/१/२/२२

९. याज्ञवल्क्यस्मृतौ ४–२०, २१, ३६

१०. – यजु. १/३१

११. – बृहदारण्यकम्–५/१४/७

१२. देवीभाग. १२–२–१४

१३. देभीभाग, १२–२–२५,१६, १७

१४. गायत्रीतन्त्रम् द्वितीयाध्यायः

१५. तत्रैव १६. –तै.आ.प्र. १०/१०

१७. अनुष्ठानप्रकाशविचारकाण्डः

१८. तत्रैव १९. तत्रैव २०. तत्रैव

२१. तत्रैव २२. तत्रैव २३. तत्रैव

२४. तत्रैव २५. तत्रैव

# किं जीवनं ते!

-डॉ.रमाकान्त शुक्लः

मनसि चिन्तय सखे! किं जीवनं ते!
रहसि शीलय सखे! किं जीवनं ते!

न वा स्वार्थ, परार्थो नापि बन्धो!
त्वया चेत्साध्यते, किं जीवनं ते! ।।1।।

न साहित्यं, न सङ्गीतं, कला वा
न रासिक्यं च ते, किं जीवनं ते!।2।।

न दाक्षिण्यं, न सौशील्यं, न कीर्तिः
न सेवा, नो दया, किं जीवनं ते!।3।।

विपदि धैर्यं, तथाभ्युदये क्षमा नो
न वा युधि विक्रमः, किं जीवनं ते!।4।।

गुरोः पित्रोर्न चरणा वन्दिताश्चेत्
अहङ्काकारात्त्वया, किं जीवनं ते!।5।।

न कश्चित्प्रेमबन्धे त्वामबध्नात्
वृथाजीविन् सखे! किं जीवनं ते!।6।।

त्वया यदि शासनासन्दीमवाप्य
न लोको रञ्जितः, किं जीवनं ते!।7।।

अहो दैनन्दिनी मतयाचना ते
वनीयक नेतृवर! किं जीवनं ते!।8।।

न निःश्वसितं, न रुदितं, मूर्च्छितं नो
प्रियाविरहे त्वया, किं जीवनं ते!।9।।

वियोगे ते जनो नो कोऽपि खिन्नः
न योगे प्रीतिमान्, किं जीवनं ते!।10।।

मनोभावो न निर्द्वन्द्वं प्रकटितः
कपटचारिंस्त्वया, किं जीवनं ते!।11।।

विषामृतयोर्विवेकं नैव कर्तुम्
त्वमीशश्चेत्तदा किं जीवनं ते!।12।।

न दुष्टास्तर्जिताः स्वीयेन महसा
न सन्तो मानिताः, किं जीवनं ते!।13।।

करालः काल इव नाभासि चेत्त्वम्
कुकृत्यानां कृते, किं जीवनं ते!।14।।

त्वया स्वान्तः सुखार्थं देववाणी
न पठिता, न श्रुता, किं जीवनं ते!।15।।

प्रभुः कर्ता च भर्ता चैव हर्ता
न चेदाराधितः, किं जीवनं ते!।16।।

निपीतं नैव मधु प्रेम्णः कदाचित्
विरस मृल्लोष्ठ रे! किं जीवनं ते!।17।।

न रसिता रसवशात्त्वत्पार्श्वमाप्ता
रहसि काचित्त्वया, किं जीवनं ते!।18।।

वृथा चन्द्रो वृथा मधुयामिनीयम्
न पार्श्वे ते प्रिया, किं जीवनं ते!।19।।

स्वदेशः सेवितो न प्राणपणतः
विकत्थन धूर्त रे, किं जीवनं ते!।20।।

मुखे मधु ते मनसि ते कालकूटः
तृणावृत कूप रे! किं जीवनं ते!।21।।

कृतघ्नत्वं कदाचारः पिशुनता
इमे त्वद्बान्धवाः, किं जीवनं ते!।22।।

स्वयं नष्टः परान्नाशयसि नित्यम्
व्यसनशतशालिनः किं जीवनं ते!।23।।

क्षणे रुष्टः क्षणे तुष्टः सखे! त्वम्
अहो चलचित्त रे! किं जीवनं ते!।24।।

मुखे ते मक्षिकाः कुर्वन्ति भिन्-भिन्
न चोड्डाययसि रे! किं जीवनं ते!।25।।

सुरक्षितमस्ति नो पदमपि पलार्थम्
अहो मन्त्रिप्रवर! किं जीवनं ते!।26।।

प्रदर्शन-गालिका-कार्यावरोधैः
अहो प्राचार्यवर! किं जीवनं ते!।27।।

प्रकृत्यङ्के न ते क्रीडा बभूव
सदा हर्म्यस्थ रे! किं जीवनं ते!।28।।

न दुग्धं माहिषं व्यायामिनस्ते
(पयो गव्यं न चेद् व्यायामिनस्ते)
सुलभमास्तेऽन्वहं! किं जीवनं ते!।29।।

न चेत् पार्श्वे सखे ते स्वास्थ्यवित्तम्
धनैरेतैरलं, किं जीवनं ते!।30।।

उपायैस्तैश्च तैर्धृतमपि मनस्ते
प्रियां नोपैति चेत् किं जीवनं ते!।31।।

उपालम्भो न चानुनयोऽपि तुष्यं
अहो प्रणयिन् युवक! किं जीवनं ते!।32।।

तवागमने तथा गमने न चर्चा
वराक प्राघुणिक! किं जीवनं ते!।33।।

परोक्षे शत्रुभिर्मित्रैस्तटस्थैः
न चेच्छ्लाघ्योऽसि रे, किं जीवनं ते!।34।।

अयं श्रोता न बोधति भाषणं ते
अनर्गलजल्पिनः किं जीवनं ते!।35।।

न दीनाः सेविताः शुद्धेन मनसा
कुनेतृ! सेवसे, किं जीवनं ते!।36।।

न माता जन्मभूर्बन्धो! मता चेत्
किमेतेनायुषा, किं जीवनं ते!।37।।

न दृष्टं भारतं स्निग्धेन मनसा।
अहो विश्वभ्रमिन्! किं जीवनं ते!।38।।

कृपेशस्याशिषो यदि वा गुरूणाम्।
न लब्धा जीवने, किं जीवनं ते!।39।।

त्वयार्वाचीनसंस्कृतमपि न पठितम्?
न दूर्वालोकिता? किं जीवनं ते!।40।।

रमाकान्तोऽभिराजो वा रथो वा।
श्रुतो यदि न त्वया, किं जीवनं ते!।41।।

## श्रीमोतीलाल-नेहरू- महाविद्यालये संस्कृत-कार्यक्रमे बहुविधाः प्रकल्पाः समुपकल्पिताः

डा.बलदेवानन्द-सागरः

"दिल्ली-विश्वविद्यालयस्य दक्षिण-परिसरस्थस्य श्रीमोतीलाल-नेहरू-महाविद्यालयस्य संस्कृत-विभागेन आयोजिते एकस्मिन् संस्कृत-कार्यक्रमे बहुविधाः प्रकल्पाः समुपकल्पिताः। कार्यक्रमारम्भे जवाहरलाल-नेहरुविश्वविद्यालयस्य संस्कृताध्ययन-विशिष्ट-केन्द्रस्य अध्यक्षेण प्राचार्येण





गिरीशनाथ-झा-वर्येण पी-पी-टी-माध्यमेन संगणकीय-भाषाविज्ञान-क्षेत्रे संस्कृतमाधृत्य विधीयमानानि कार्याणि विशदीकृतानि। अवसरेह्यस्मिन् तेन एतदपि प्रदर्शितं यत् न केवलं भारतीय-भाषाणाम्, अपि च, कासाञ्चन योरोपीय-भाषाणामपि पोषिकास्ति पाणिनीया संस्कृत-भाषा। आधुनिकं संगणकीय-भाषाविज्ञानं साम्प्रतं सन्दर्भेह्यस्मिन् अनेकाः शोध-परियोजनाः अङ्गीकृत्य सुबहूनि कार्याणि विदधाति। एतदनु स्पर्धा-द्वयं [ श्लोकोच्चारणं प्रश्नमञ्चेति ] सम्पन्नम्, ययोः विभिन्न-महाविद्यालयीयच्छात्रैः छात्रीभिश्च सोत्साहं सहभागित्वं निर्व्यूढम्। निर्णायक-त्रयेण [ बलदेवानन्द-सागर-पंकजमिश्र-विकासेति ] स्पर्धाद्वयस्य निर्णायक-भूमिका अनुष्ठिता। समग्रमपि कार्यक्रम-संयोजनं डो.कौशल्या-महाभागया सुष्ठुतया सम्पादितम्।" ....

## २०१४वर्षस्य राष्ट्रपतिसम्मानप्राप्तकर्तृणां संक्षिप्तपरिचयः ( १३ )

# प्रो.शशिप्रभाकुमार



प्रो.शशिप्रभामहोदयायाः जन्म 1951तमे वर्षे नवम्बरमासस्य प्रथमे दिनांकेऽभवत्। पितुः नाम श्रीहंसराजसचदेवा, माता श्रीमतीकृष्णारानीसचदेवा अस्ति। आरम्भिकी शिक्षा सासनीस्थे कन्यागुरुकुले उच्चशिक्षा च मेरठदिल्लीविश्वविद्यालयोः सम्पन्ना।

साम्प्रतं प्रो.शशिप्रभामहोदया सांचीबौद्ध-भारतीयज्ञानाध्ययनविश्वविद्यालयस्य कुलपतिपदे विराजति। सममेव भवती हिन्दूविश्वविद्यालयस्यअमेरिकायां मानद-अनुलग्न आचार्या अस्ति। अस्मात् पूर्वं भवती जवाहरलालनेहरुविश्वविद्यालयस्य विशिष्टसंस्कृताध्ययनकेन्द्रस्य अध्यक्षा आसीत्। 2012-13 तमे वर्षे भवती दिल्लीसर्वकारेण दिल्लीसंस्कृताकादम्याः उपाध्यक्षा अपि च 2014तमे वर्षे द्वितीयसंस्कृतायोगस्य मनोनीतसदस्या आसीत्। 2015तमे वर्षे थाईलैण्डदेशे शिल्पाकार्नविश्वविद्यालये समायोजिते विश्वसंस्कृतसम्मेलने भवती सूत्र-स्मृति-शास्त्रवर्गस्य संयोजिका नामिता आसीत्।

विगतत्रिचत्वारिंशवर्षाणां अध्यापनावधौ भवत्यां मार्गदर्शने 44छात्रैः शोधकार्यं कृतम्। 8छात्राणां शोधकार्यं जायमानमस्ति। भवत्या 25ग्रन्थाः 103शोधपत्राणि च प्रकाशिताः। प्रमुख कृतयः - भारतीयदर्शनम्, वैशेषिकदर्शने पदार्थनिरूपणं, वैशेषिकदर्शनपरिशीलनम्, वैदिक-अनुशीलनम्, वैदिकविमर्शः, संस्कृत-संस्कृतिः एवं संस्कारःआदयः सन्ति। अपि च एका कृति ब्रिटेन देशात् प्रकाशिता।

पुरस्काराः - श्रीरामकृष्णसंस्कृतसम्मानम् (वर्ल्ड एजुकेशन फाऊंडेशन, कनाडा), शंकरपुरस्कारः (के.के.बिरला फाउंडेशन नवदेहली), महाकविकालिदाससंस्कृतसाधनापुरस्कारः (महाराष्ट्रशासनः) तथा च संस्कृतसाहित्यसेवासम्मानम् (दिल्लीसंस्कृताकादमी), अपि चान्यो बहवः पुरस्काराः भवत्या प्राप्ताः। अद्यत्वे संस्कृताराधनायां निरताः।

संकेतः
कुलपतिः
सांची-बौद्ध-भारतीय-ज्ञान-अध्ययन-विश्वविद्यालयः
एस.डी.एक्स.-12, मिनल रेसीडेन्सी, जे.के.रोड भोपाल, मध्यप्रदेश-462023

खादी वस्त्र ही नहीं, विचार है !
आदर्श ग्रामोद्योग समिति, दिल्ली
खादी वस्त्रों का विशाल भण्डार
✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल (रेडीमेड) ✪ रेशम साड़ी (सिल्क)
✪ रेशम स्पन व रेडीमेड ✪ पोली खादी
सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।
खादी ग्रामोद्योग भवन
✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ० प्र०)
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोन:-0120-2631855, 9899334204

G.C.ENTERPRISES
GOVT. CONTRACTOR
Prop. TARLOK PAPNEJA
SPECIALIST IN WATER TREATMENT
C-3/153, Yamuna Vihar, Delhi - 53
Phone : 22911281, 22919451

Girish Kumar Bansal,Manager
Vidya Deep Public School
(Govt. Recognised)
C-400/A, Main Market
Bhajan Pura, Delhi-110053
Mob.: +91-9555955591
+91-9810067099,+011-22563764

# राष्ट्रियसंस्कृतसंस्थानस्य त्रयोदशतमः नाट्यमहोत्सवः सम्पन्नः

नवदेहली । राष्ट्रियसंस्कृतसंस्थानेन आयोजितः त्रिदिवसीयत्रयोदशतमः संस्कृतनाट्यमहोत्सवो सानन्दं सम्पन्नतामगात् । अस्मिन् महोत्सवे जम्मू-अगरतला-गरली-इलाहाबाद-लखनऊ-पुरी -आदीनां संस्थानस्य परिसराणां प्रतिभागिभिः नाट्यप्रस्तुतिः कृता।





देशस्य विभिन्नेभ्यः राज्येभ्यः समागत्य छात्रैः विभिन्नानां नाटकानां मञ्चनेन भरतमुनेः नाट्यसिद्धान्तानां प्रायौगिकं स्वरूपं प्रस्तुतम् ।

समारोहस्य प्रथमे दिवसे मुम्बईपरिसरस्य छात्रैः विवाहविडम्बनम्, भोपालपरिसरस्य छात्रैः हास्यचूडामणिनाटकस्य, अपि च श्रृंगेरीपरिसरस्य छात्रैः भगवदज्जुकीयमिति नाटकस्य मञ्चनं कृतम् ।

कार्यक्रमस्य समारोपसत्रे मुख्यातिथिभिः प्रो. अभिराजराजेन्द्रमिश्रमहोदयेन मुक्तकण्ठेन सर्वासां प्रस्तुतीनां भूरिष्ठाः प्रशंसा कृता । तैः कथितं यत् छात्रैः प्रहसनानां मञ्चनेन विकृतिभ्यः समाजस्य संरक्षणाय सार्थकं कश्चित् प्रयासो विहितः ।

तत्र च सारस्वतातिथिभिः प्रो.एस.आर.लीलामहोदया कथितं यत् एतादृशेभ्यः प्रायोगिककार्यक्रमेभ्यः संस्कृतस्य प्रायोगिकता स्वतः सिद्ध्यति । संस्कृतस्य इयं महत्ता वर्तते यत् द्विसहस्रवर्षपूर्वलिखितस्य प्रहसनस्य अद्यापि अत्र मञ्चनं जायते । सहस्रवर्षेभ्यः संरक्षितायामस्यामेव भाषायां नाटकानां प्रस्तुतिर्क्रियते इत्येव अस्याः भाषायाः सार्थकता ।

कार्यक्रमस्य अध्यक्षेण राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिना प्रो. परमेश्वरनारायणशास्त्रिणा कथितं यत् छात्राणां अयं प्रयासो सर्वथा प्रशंसनीयः, एतेषां प्रोत्साहनमेव भविष्ये अस्याः प्रतियोगितायाः सार्थकतां प्रचारयिष्यति ।

त्रिदिवसीयास्य संस्कृतनाट्यमहोत्सवस्य संयोजकेन मुक्तस्वाध्यायपीठस्य निदेशकेन प्रो.रमाकान्तपाण्डेयमहोदयेन कथितं यत् त्रिदिवसीयास्मिन् कार्यक्रमे एकादशप्रहसनानां मञ्चनं विविध परिसराणां छात्रैः कृतम् । त्रयोदशनाट्यविशेषज्ञैः अस्यमूल्याकंनं कृतम् । अस्मिन् वर्षे प्रथमपुरस्कारः गुरुवायुरपरिसरस्य मत्तविलासप्रहसनाय, द्वितीयपुरस्कारः मुम्बईपरिसरस्य विवाहविडम्बनप्रहसनाय, अपि च तृतीयपुरस्कारः श्रृङ्गेरीपरिसरस्य भगवदज्जुकीयमिति प्रहसनाय प्रदत्तः । अन्येऽपि बहवः पुरस्काराः आयोजकैः प्रदत्ताः तत्र सर्वश्रेष्ठः नायकः, सर्वश्रेष्ठा अभिनेत्री, सर्वश्रेष्ठः निर्देशकः इत्यादयः पुरस्काराः सम्मिलिताः आसन् ।




संस्कृतनाट्यमहोत्सवात् पूर्वं पत्रकारान् सम्बोधयन्तः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः प्रो. परमेश्वरनारायणशास्त्री एवं मुक्तस्वाध्यायपीठस्य निदेशकाः प्रो.रमाकान्तपाण्डेयः।




अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः,
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- संदीप कुमार उपाध्याय, सन्नीकुमार, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेल: sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।